# तृतीयः विभूतिपादः ।

उक्तानि पञ्चबहिः अङ्गाणि साधनानि । धारणा वक्तव्या—

देशबन्धः चित्तस्य धारणा ॥१॥

नाभिचक्रे, हृदयपुण्डरीके, मूर्ध्नि ज्योतिषि, नासिकाग्रे, जिह्वाग्रे, इत्यादिम्-आदिषु देशेषु, बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बन्ध इति धारणा ॥१॥

तत्र प्रत्यय एकतानता ध्यानम् ॥२॥
तस्मिन् देशे ध्येय आलम्बनस्य प्रत्ययस्य एकतानता सदृशः प्रवाहः प्रत्यय अन्तरेण अपरामृष्टो ध्यानम् ॥२॥

तदेव अर्थ-मात्र-निर्भासं स्वरूप-शून्यम् इवं समाधिः ॥३॥

ध्यानम् एव ध्येय आकार-निर्भासं प्रत्यय आत्मकेन स्वरूपेण शून्यम् इव यदा भवति, ध्येयस्वभावा-वेशात् तदा समाधिः इति उच्यते ॥३
त्रयम् एकत्र संयमः ॥४॥

तत् एतद् धारण-ध्यान-समाधि-त्रयम् एकत्र समयः । एकविषयाणि त्रीणि साधनानि संयमः इति उच्यते । तदस्य त्रयस्य तान्त्रिकी परिभाषा संयमः इति ॥४॥

तत् जयात् प्रज्ञालोकः ॥५॥

तस्य संयमस्य जयात् समाधि-प्रज्ञाया भवति अलोकः । यथा यथा संयमः स्थिरपदो भवति, तथा तथा समाधि-प्रज्ञा विशारदी भवति ॥५॥

तस्य भूमिषु विनियोगः ॥६॥

तस्य संयमस्य जितभूमेः या अनन्तरा भूमिः तत्र विनियोगः । न हि अजिताधरभूमिः अनन्तर-भूमिं विलङ्घ्य प्रान्त-भूमिषु संयमं लभते । तत् अभावात् च कुतः तस्य प्रज्ञा-लोकः? ईश्वर-प्रसादात्-जित-उत्तर-भूमिकस्य च न अधर-भूमिषु पर-चित्त-ज्ञानादिषु संयमः युक्तः । कस्मात्? तदर्थस्य अन्यत एव अवगतत्वात्। भूमेः अस्या इयम् अनन्तरा भूमिः इति अत्र योगः एव उपाध्यायः । कथं ? एवं हि उक्तम्— "योगेन योगः ज्ञातव्यः योगः योगात् प्रवर्तते । यः अप्रमत्तः तु योगेन सः योगे रमते चिरम्" ॥ इति ॥६॥

त्रयम् अन्तरङ्गं पूर्वेभ्यः ॥७॥

तदेतद् धारणा-ध्यान-समाधि-त्रयम् अन्तरङ्गं सम्प्रज्ञातस्य समाधेः पूर्वेभ्यो यमादिभ्यः पञ्चभ्यः साधनेभ्यः इति ॥७॥

तदपि बहिरङ्गं निर्बीजस्य ॥८॥

तदपि अन्तरङ्गं साधन-त्रयं निर्बीजस्य योगस्य बहिरङ्गं भवति । कस्मात्? तद् अभावे भावाद् इति ॥८॥
अथ निरोध-चित्त-क्षणेषु चलं गुण-वृत्तम् इति कीदृशः तदा चित्त-परिणामः ?

व्युत्थान-निरोध-संस्कारयोः अभिभव-प्रादुर्भावौ निरोधक्षण-चित्तान्वयो निरोध-परिणामः ॥९॥

व्युत्थान-संस्काराः चित्तधर्मा न ते प्रत्ययात्मका इति प्रत्यय-निरोधे न निरुद्धाः । नोरोधसंस्कारा अपि चित्त-धर्माः, तयोः अभिभव-प्रादुर्भावौ । व्युत्थान-संस्कारा हीयन्ते, निरोध-संस्काराः आधीयन्ते । निरोध-क्षणं चित्तमन्वेति । तदेकस्य चित्तस्य प्रतिक्षणमिदं संस्कारान्यथात्वं निरोध-परिणामः । तदा संस्कार-शेषं चित्तमिति निरोध-समाधौ व्याख्यातम् ॥९॥

तस्य प्रशान्त-वाहिता संस्कारात्॥१०॥

निरोध-संस्कारान् निरोध-संस्कार-अभ्यास-पाटवापेक्षा प्रशान्त-वाहिता चित्तस्य भवति । तत् संस्कारमान्द्ये व्युत्थान-धर्मिणा संस्कारेण निरोध-धर्मः संस्कारः अभिभूयत इति ॥१०॥

सर्वार्थता एकाग्रतयोः क्षय-उदयौ चित्तस्य समाधि-परिणामः ॥११॥

सर्वार्थता चित्त-धर्मः । एकाग्रता-अपि चित्त-धर्मः । सर्वार्थतायाः क्षयः तिरोभावः इति अर्थः । एकाग्रतायाः उदयः आविर्भावः इति अर्थः । तयोः र्धर्मित्वेन अनुगतं चित्तम् । तत् इदं चित्तम्-अपायोपजननयोः स्वात्म-भूतयोः धर्मयोः अनुगतं समाधीयते, सः चित्तस्य समाधि-परिणामः ॥११॥

ततः पुनः शान्त उदितौ तुल्य-प्रत्ययौ चित्तस्य एकाग्रता-परिणामः ॥१२॥

समाहितचित्तस्य पूर्वप्रत्ययः शान्तः उत्तरः तत् सदृशः उदितः । समाहित-चित्तम्-उभयोः अनुगतं पुनः तथैव आ समाधिभ्रेषादिति । सः खलि अयं धर्मिणः चित्तस्य-एकाग्रता-परिणामः ॥१२॥

एतेन भूतेन्द्रियेषु धर्म-लक्षण-अवस्था-परिणामा व्याख्याताः ॥१३॥

एतेन पूर्वोक्तेन चित्त-परिणामेन धर्म-लक्षण-अवस्थारूपेण भूत-इन्द्रियेषु धर्म-परिणामः लक्षण-परिणामः अवस्था-परिणामः च उक्तः वेदितव्यः । तत्र व्युत्थान-निरोधयोः र्धर्मयोः अभिभव-प्रादुर्भावौ धर्मिणि धर्म-परिणामः । लक्षण-परिणामः च निरोधः त्रिलक्षणः त्रिभिः अरध्वभिः युक्तः । सः खलु-अनागत-लक्षणम्-अध्वानं प्रथमं हित्वा धर्मत्वम् अनन्तिक्रान्तः वर्तमानं लक्षणं प्रतिपन्नः , यत्र अस्य स्वरूपेण अभिव्यक्तिः । एषः अस्य द्वितीयोऽध्वा । न च अतीत-अनागताभ्यां लक्षणाभ्यां वियुक्तः । तथा व्युत्थानं त्रिलक्षणं तिर्भिरध्वभिः युक्तं वर्तमानं लक्षणं हित्वा धर्मत्वम् अनतिक्रान्तम् अतीतलक्षणं प्रतिपन्नम् । यत्रास्य स्वरूप-अभिव्यक्तौ सत्यां व्यापारः, एषः अस्य द्वितीयोऽध्वा । न च अतीत-अनागताभ्यां लक्षणाभ्यां वियुक्तम् इति । एवं पुनः निरोधः एवं पुनः व्युत्थानम् इति तथा-अवस्था-परिणामः, तत्र निरोध-क्षणेषु निरोध-संस्काराः बलवन्तो भवन्ति

दुर्बलाः व्युत्थान-संस्काराः इति । एषः धर्माणाम्-अवस्था-परिणामः । तत्र धर्मिणो धर्मैः परिणामो धर्माणां त्र्यध्वनां लक्षणैः परिणामः लक्षणानाम् अपि अवस्थाभिः परिणामः इति ।

एवं धर्म-लक्षण-अवस्था-परिणामैः शून्यं न क्षणमपि गुणवृत्तम् अवतिष्ठते । चलं च गुणवृत्तम् । गुण-स्वाभाव्यं तु प्रवृक्त कारणम् उक्तं गुणानाम् इति । एतेन भूत इन्द्रियेषु धर्म-धर्मि-भेदात् त्रिविधः परिणामः वेदितव्यः । परमार्थ-तत्सु एक एव परिणामः धर्मिस्व-रूपमात्रो हि धर्मो धर्मि-विक्रिय-एव-एषा धर्म-द्वारा प्रपञ्च्यति इति । तत्र धर्मस्य धर्मिणि वर्तमानस्य-एवाध्वस्वतीत-अनागत-वर्तमानेषु भाव अन्यथात्वं भवति, न तु द्रव्य अन्यथात्वम् । यथा सुवर्ण-भाजनस्य भित्त्वा अन्यथा क्रियमाणस्य भाव अन्यथात्वं भवति, न सुवर्णानि यथात्वमिति ।

अपरः आह—धर्मान्-अभ्यधिको धर्मो, पूर्वतत्त्वान्-अतिक्रमा, पूर्वा-परावस्था-भेदम्-अनुपतितः कौटस्थः एन विपरिवर्तेत यत् अन्वयी स्यात् इति । अयम् अदोषः । कस्मात्? एकान्ततानभ्युपगमात्। तदेतत् त्रैलोक्यं व्यक्तेः अपैति । कस्मात्? नित्य-प्रतिषेधात्। अपेतम् अपि अस्ति विनाश-प्रतिषेधात्। संसर्गात् च अस्य सौक्ष्म्यम् । सौक्ष्म्याः च अनुपलभ्दिः इति । लक्षण-परिणामः धर्मोऽध्वसु वर्तमानः अतीतः अतीत-लक्षण-युक्तः अनागत-वर्तमानाभ्यां लक्षणाभ्याम् अवियुक्तः । तथा वर्तमानः अनागत-लक्षण-युक्तः वर्तमान-अतीताभ्यां लक्षण-अभ्याम-वियुक्तः । तथा वर्तमानः वर्तमान-लक्षण-युक्तः अतीत-अनागताभ्यां लक्षणाभ्याम्-अवियुक्तः इति । यथा - पुरुष एकस्यां स्त्रियां रक्तः न शेषासु विरक्तः भवति इति ।

अत्र लक्षण-परिणामे सर्वस्य सर्व-लक्षण-योगात् अध्वसङ्करः प्राप्नोति इति परैर्दोषः च उद्यतः इति । तस्य परिहारः—धर्माणां धर्मत्वम् अप्रसाध्यम् । सति च धर्मत्वे लक्षणभेदः अपि वाच्यः न वर्तमान-समय एवास्य धर्मत्वम् । एव्घि न चित्तं राग-धर्मकं स्यात्, क्रोध-काले रागस्य असमुदाचारात् इति । किं च, त्रयाणां लक्षणानां युगपदेकस्यां व्यक्तौ

नास्ति सम्भवः । क्रमेण तु स्वव्यञ्जक-अञ्जनस्य भावः भवेत् इति । उक्तं च - "रूप-अतिशयाः वृत्ति-अतिशयाः च परस्परेण विरुध्यन्ते । सामान्यानि तु अतिशयैः सह प्रवर्तन्ते" तस्मात् असङ्करः । यथा रागस्य एव क्वचित् समुदाचारः इति न तदानीम् अन्यत्र-अभावः । किन्तु केवलं सामान्येन समन्वागतः इति अस्ति तदा तत्र तस्य भावः, तथा लक्षणस्य इति । न धर्मी त्र्यध्वा । धर्माः तु त्र्यध्वानः । ते लक्षिताः अलक्षिताः च । तां ताम् अवस्थां प्राप्नुवन्तः अन्यत्वेन प्रतिनिर्दिश्यन्ते अवस्थन्तरतः न द्रव्यान्तरतः, यथा एका रेखा शतस्थाने शतं दशस्थाने दशैकं च एकस्थाने । यथा च एकत्वे अपि स्त्री माता च उच्यते दुहिता च स्वसा चेति ।

अवस्था-परिणामे कौटस्थ्य-प्रसङ्ग-दोषः कैः चित् उक्तः । कथं ? अध्वनो व्यापारेण व्यवहितत्वात्। यदा धर्मः स्व-व्यापारं न करोति, तत् अनागतः , यदा करोति तदा वर्तमानः , यदा कृत्वा निवृत्तः तत् अतीत इति एवं धर्म-धर्मिणोः लक्षणानाम् अवस्थानां च कौटस्थ्यं प्राप्नोति इति परैः दोषः उच्यते ।

न असौ दोषः । कस्मात्? गुणि-नित्यत्वे अपि गुणानां विमर्द-वैचित्र्यात्। यथा संस्थानम्-आदिमत्-धर्ममात्रं शब्दादीनां गुणानां विनाश्य-विनाशिनाम् एवं लिङ्गम्-आदिमत्-धर्ममात्रं सत्त्वादीनां गुणानां विनाश्य-विनाशिनाम् । तस्मिन् विकार-संज्ञेति ।

तत्र इदम् उदाहरणम्—मृत्-धर्मी पिण्डाकारात् धर्मात् धर्मान्तरम् उपसम्पध्यमानः धर्मतः परिणमते घटाकारः इति। घटाकारः अनागतं लक्षणं हित्वा वर्तमान-लक्षणं प्रतिपद्यते इति लक्षणतः परिणमते । घटः नवपुराणतां प्रति-लक्षणम्-अनुभवन्-अवस्थापरिणामं प्रतिपद्यतः इति । धर्मिणः अपि धर्मान्तरम्-अवस्था, धर्मस्यापि लक्षणान्तरम्-अवस्था इति एक एव द्रव्य-परिणामः भेदेन उपदर्शितः इति । एवं पदार्थ-अन्तरेषु अपि योज्यम् इति ।

त एते धर्म-लक्षण-अवस्था-परिणामा धर्मि-स्वरूपम्-अनतिक्रान्ता इति एक एव परिणामः सर्वान् अमून् विशेषान् अभिप्लवते । अथ कोऽयं परिणामः ? अवस्थितस्य द्रव्यस्य पूर्व-धर्म-निवृत्तौ धर्मान्तरः उत्पत्तिः परिणामः इति॥१३॥

तत्र—

शान्त-उदित-अव्यपदेश्य-धर्मानुपाती धर्मी ॥१४॥

योग्यत-अवच्छिन्ना धर्मिणः शक्तिः एव धर्मः । सः च फल-प्रसव-भेदानुमितसद्भाव एकस्यान्यो अन्यः च परिदृष्टः । तत्र वर्तमानः स्वव्यापारमनुभवन्धर्मो धर्मानतरेभ्यः शान्तेभ्यः च अव्यपदेशेभ्यः च भिद्यते । यदा तु सामान्येन समन्वागतः भवति, तदा धर्मि-स्वरूप-मात्रत्वात्कः असौ केन भिद्यते ? तत्र त्रयः खलु धर्मिणो धर्माः शान्ता उदिता अव्यपदेश्याः च इति । तत्र शान्ता ये कृत्वा व्यापारानुपरताः । सव्यापारा उदिताः । ते च अनागतस्य लक्षणस्य समनन्तराः । वर्तमानस्य अनन्तरा अतीताः । किमर्थम् अतीतस्य अनन्तरा न भवन्ति वर्तमानाः ? पूर्व-पश्चिमताया अभावात। यथा अनागत-वर्तमानयोः पूर्व-पश्चिमता न एवम् अतीतस्य । तस्मात् न अतीतस्य अस्ति समनन्तरः । तद् अनागतः एव समनन्तरः भवति वर्तमानस्य ।

अथ अव्यपदेश्याः के ? सर्वं सर्वात्मकम् इति । यथा उक्तं—जल-भूम्योः पारिणामिकं रसादि-वैश्वरूप्यं स्थावरेषु दृष्टं, तथा स्थावराणां जङ्गमेषु जङ्गमानां स्थावरेषु इति एवं जाति अनुच्छेदेन सर्वं सर्वात्मकम् इति ।

देश-काल-आकार-निमित्तापबन्धात् न खलु समान-कालम् आत्मनाम् अभिव्यक्तिः इति । यः एतेषु अभिव्यक्त-अनभिव्यक्तेषु धर्मेषु अनुपाती सामान्य-विशेषात्मा सः अन्वयी धर्मी । यस्य तु धर्म-मात्रम् एव इदं निरन्वयं तस्य भोगाभावः । कस्मात्? अन्येन विज्ञानेन कृतस्य कर्मणःअन्यत्कथं भोकृत्वेन अधिक्रियेत ? तत् स्मृति अभावः च न अन्यदृष्टस्य स्मरणम् अन्यस्य अस्ति इति । वस्तु-प्रत्यभिज्ञानात् च स्थितः अन्वयी धर्मी यो धर्मान्यथात्वमभ्युपगतः प्रत्यभिज्ञायते । तस्मात् न इदं धर्ममात्रं निरन्वयम् इति ॥१४॥

क्रमान्यत्वं परिणाम-अन्यत्वे हेतुः ॥१५॥

एकस्य धर्मिणः एक एव परिणामः इति प्रसक्ते क्रमान्यत्वं परिणामान्यत्वे हेतुः भवति इति । तत् यथा—चूर्ण-मृत्, पीण्ड-मृत्, घट-मृत्, कण-मृत् इति च क्रमः । यः यस्य धर्मस्य समनन्तरः धर्मः सः तस्य क्रमः । पिण्डः प्रच्यवते घट उपजायतः इति धर्म-परिणाम-क्रमः । लक्षण-परिणाम-क्रमः घटस्य-अनागत-भावात् वर्तमान-भाव-क्रमः । तथा पिण्डस्य वर्तमान-भावात् अतीत-भाव-क्रमः । न अतीतस्य अस्ति क्रमः । कस्मात्? पूर्वपरतायां सत्यां समनतरत्वम् । सा तु नास्ति अतीतस्य । तस्मात् द्वयोः एव लक्षणयोः क्रमः । तथा अवस्था-परिणाम-क्रमः अपि घटस्य अभिनवस्य प्रान्ते पुराणता दृश्यते । सा च क्षण-परम्परानुपातिना क्रमेण-अभिव्यज्यमाना परां व्यक्तिम् आपद्यत इति । धर्म-लक्षणाभ्यां च विशिष्टः अयं तृतीयः परिणामः इति ।

त एते क्रमा धर्म-धर्मि-भेदे सति प्रतिलब्ध-स्वरूपाः । धर्मोऽपि धर्मी भवति अन्य-धर्म-स्वरूप-अपेक्षयेति । यदा तु परमार्थतो धर्मिणि अभेद-उपचारः तत् द्वारेण सः एव-अभिधीयते धर्मः तदा अयम् एकत्वेन एव क्रमः प्रत्यवभासते । चित्तस्य द्वये धर्माः परिदृष्टाः च अपरिदृष्टाः च । तत्र प्रत्ययात्मकाः परिदृष्टाः । वस्तु-मात्रात्मका अपरिदृष्टाः । ते च सप्त-एव भवति अनुमानेन प्रापित-वस्तु-मात्र-सद्भावाः ।

“निरोध-धर्म-संस्काराः परिणामः अथ जीवनम् ।
चेष्टा शक्तिः च चित्तस्य धर्मा दर्शनवर्जिताः ॥” इति ॥१५॥

अतः योगेन उपात्त-सर्व-साधनस्य बुभुत्सितार्थ-प्रतिपत्तये संयमस्य विषय उपक्षिप्यते—

परिणाम-त्रय-संयमात् अतीत-अनागत-ज्ञानम् ॥१६॥

धर्म-लक्षण-अवस्था-परिणामेषु संयमात् योगिनां भवति अतीत-अनागत-ज्ञानम् । धारणा-ध्यान-समाधि-त्रयम् एकत्र संयम उक्तः । तेन परिणाम-त्रयं साक्षात् क्रियमाणम् अतीत-अनागत-ज्ञानं तेषु सम्पादयति ॥१६॥

शब्द-अर्थ-प्रत्ययानाम् इतर-इतर-अध्यासात् संस्करः तत् प्रविभाग-संयमात् सर्व-भूत-रुत-ज्ञानम् ॥१७॥

तत्र वाक्-वर्णेषु एव अर्थवती । श्रोत्रं च ध्वनि-परिणाम-मात्र-विषयम् । पदं पुनः नादानुसंहार-बुद्धि-निर्ग्राह्यम् इति । वर्णा एक-समय-असम्भवित्वात् प्ररस्पर-निरन्गुग्रहात्मानः । ते पदमसंस्पृश्य-अनुपस्था-अपि आविर्भूतास्तिरोभूताः च इति प्रत्येकमपदस्वरूपाः उच्यन्ते ।

वर्णः पुनः एक-एकः पद-आत्मा सर्व-अभिधान-शक्ति-प्रचितः सहकारि-वर्णान्तर-प्रतियोगित्वात् वैश्व-रूप्यम् इव आपन्नः । पूर्वः च उत्तरेणोत्तरः च पूर्वेण विशेषे अवस्थापितः इति । एवं बहवो वर्णाः क्रमानुरोधिनः अर्थ-सङ्केतेन अवच्छिन्ना इयन्त एते सर्वाभिधान-शक्ति-परिवृता गकार-औकार-विसर्जनीयाः सास्नादिमन्तमर्थं द्योतयन्ति इति ।

तत् एतेषाम् अर्थ-सङ्केतेन अवच्छिन्नानाम् उपसंहृत-ध्वनि-क्रमाणां यः एकः बुद्धि-निर्भासस्तत्पदं वाचकं वाच्यस्य सङ्केत्यते । तत् एकं पदम् एक-बुद्धि-विषयम्-एक-प्रयत्न-अक्षिप्तम्-अभागम्-अक्रमम्-अवर्णम् । बौद्धम् अन्त्य-वर्ण-प्रत्यय-व्यापार-उपस्थापितम्, परत्र प्रतिपिपादयिषया वर्णैः एव-अभिधीयमानैः श्रूयमाणैः च श्रोतृभिः अनादि-वाक्-व्यवहार-वासन-अनुविद्धया लोक-बुद्ध्या सिद्धवत्सं प्रतिपत्त्या प्रतीयते । तस्य सङ्केत-बुद्धितः प्रविभागः । एतावताम् एवं-जातीयकः अनुसंहार एतस्य अर्थस्य वाचकः इति ।

सङ्केतस्तु पद-पदार्थयोः इतरेतर अध्यासरूपः स्मृत्यात्मकः यः अयं शब्दः सः अयम् अर्थः । योऽर्थः सः शब्दः इति । एवम् इतर-इतर-अध्यास-रूपः सङ्केतः भवति इति । एवम् एते शब्दार्थ-प्रत्यया इतर-इतर-अध्यासात् सङ्कीर्णाः—गौः इति शब्दः गौः इति अर्थः गौः इति ज्ञानम् । यः एषां प्रविभागज्ञस्स सर्ववित। सर्वपदेषु चास्ति वाक्य-शक्तिः । वृक्ष

इत्युक्ते अस्ति इति गम्यते । न सत्तां पदार्थौ व्यभिचरति इति । तथा न ह्यसाधना क्रियास्ति इति । तथा च पचति इति उक्ते सर्वकारकाणाम् आक्षेपः । नियमार्थः अनुवादः कर्तृ-करण-कर्मणां चैत्र-अग्नि-तण्डुलानाम् इति ।

दृष्टं च वाक्यार्थे पदरचनं श्रोत्रियः छन्दः अधीते, जीवति प्राणान् धारयति । तत्र वाक्ये पदार्थ-अभिव्यक्तिः ततः पदं प्रविभज्य व्याकरणीयं क्रिया-वाचकं वा कारक-वाचकं वा ।

अन्यथा भवति अश्वः अजापय इति एवम् आदिषु नाम-आख्यात-सारूप्यात् अनिर्ज्ञातं कथं क्रियायां कारके वा व्याक्रियेतेति । तेषां शब्द-अर्थ-प्रत्ययानां प्रविभागः । तत् यथा—वेतते प्रासाद इति क्रियार्थः । श्वेतः प्रासाद इति कारकार्थः शब्दः । क्रियाकारकात्मा तदर्थः प्रत्ययः च । कस्मात्? सः अयम् इति अभिसम्बन्धादेकाकार एव प्रत्ययः सङ्केतः इति । यः अस्तु श्वेतः अर्थः सः शब्द-प्रत्यययोः आलम्बनीभूतः । सः हि स्वाभिः अवस्थाभिः विक्रियमाणः न शब्द-सहगतः न बुद्धि-सहगतः । एवं शब्दः एवं प्रत्ययः न इतर इतर-सहगत इति अन्यथा शब्दः अन्यथार्थः अन्यथा प्रत्ययः इति विभागः । एवं तत् प्रविभाग-संयमाद्योगिनः सर्व-भूत-रुत-ज्ञानं सम्पद्यत इति ॥१७॥

संस्कार-साक्षत्करणात् पूर्व-जाति-ज्ञानम् ॥१८॥

द्वये खलु अमी संस्काराः स्मृति-क्लेश-हेतवः वासना-रूपाः विपाक-हेतवः धर्म-अधर्म-रूपाः । ते पूर्वभव-अभिसंस्कृताः परिणाम-चेष्टानिरोध-शक्ति-जीवन-धर्मवत् अपरिदृष्टाः चित्त-धर्माः । तेषु संयमः संस्कार-साक्षत्क्रियायै समर्थः । न च देश-काल-निमित्त-अनुभवैः विना तेषाम् अस्ति साक्षात्करणम् । तत् इत्थं संस्कार-साक्षत्करणात् पूर्व-जाति-ज्ञानम् उत्पद्यते योगिनः । परत्र अपि एवमेव संस्कार-साक्षात्करणात् पर-जाति-संवेदनम् ।

अत्र इदम् आख्यानं श्रूयते—भगवतः जैगीषव्यस्य संस्कार-साक्षात्करणात् दशसु महासर्गेषु जन्म-परिणाम-क्रमम् अनुपश्यतः विवेकजं ज्ञानं प्रादुरभवत। अथ भगवान् अवट्यः तनुधरः तम् उवाच—दशसु महासर्गेषु भव्यत्वात् अनभिभूत-बुद्धि-सत्त्वेन त्वया

नरक-तिर्यक् गर्भ-सम्भवं दुःखं सम्पश्यता देव-मनुष्येषु पुनः पुनः उत्पद्यमानेन सुख-दुःखयोः किम् अधिकम् उपलब्धम् ? इति ।

भगवन्तम् अवट्यं जैगीषव्य उवाच—दशसु महासर्गेषु भव्यत्वात् अनभिभूत-बुद्धिसत्त्वेन मया नरक-तिर्यग्भवं दुःखं सम्पश्यता देवमनुष्येषु पुनः पुनः उत्पद्यमानेन यत् किञ्चित् अनुभूतं तत् सर्वं दुःखमेव प्रत्यवैमि ।

भगवान् अवट्यः उवाच—यत् इदम् अयुष्मतः प्रधान-वशित्वम् अनुत्तमं च सन्तोष-सुखं किम् इदम् अपि दुःख-पक्षे निक्षिप्तम् ? इति ।

भगवान् जैगीषव्यः उवाच—विषय-सुख-अपेक्षय-एव इदम् उनुत्तमं सन्तोष-सुखम् उक्तं कैवल्य-अपेक्षया दुःखमेव । बुद्धि-सत्त्वस्य अयं धर्मः त्रिगुणः । त्रिगुणः च प्रत्ययः हेयपक्षे न्यस्तः इति । दुःख-रूपः तृष्णा-तन्तुः, तृष्णा-दुःख-सन्तान-अपगमात् तु प्रसन्नम् अबाधं सर्वानुकूलं सुखम् इदम् उक्तम् इति ॥१८॥

प्रत्ययस्य परचित्त-ज्ञानम् ॥१९॥

प्रत्यये संयमात् प्रत्ययस्य साक्षात्करणात् ततः परचित्त-ज्ञानम् ॥१९॥

न च तत् सालम्बनं, तस्य-अविषयी-भूतत्वात्॥२०॥

रक्तं प्रत्ययं जानाति इति अमुष्मिन् आलम्बने रक्तम् इति न जानाति । परप्रत्ययस्य यदा-आलम्बनं तत् योगि-चित्तेन न आलम्बनीकृतम् । परप्रत्ययमात्रं तु योगि-चित्तस्य आलम्बनीभूतम् इति ॥२०॥

काय-रूप-संयमात् तत्-ग्राह्य-शक्ति-स्तम्भे चक्षुः-प्रकाशा-संप्रयोगे अन्तर्धानम् ॥२१॥

कायस्य रूपे संयमात् रूपस्य या ग्राह्या शक्तिस्तां प्रतिबध्नाति । ग्राह्य-शक्ति-स्तम्भे सति चक्षुः-प्रकाशा-संप्रयोगे-अन्तर्धानम् इति उत्पद्यते योगिनः । एतेन शब्दात् अन्तर्धानम् उक्तं वेदितव्यम् ॥२१॥

सोपक्रमं निरुपक्रमं च कर्म, तत् संयमात् अपरान्त-ज्ञानम्, अरिष्टेभ्यः वा ॥२२॥

आयुः विपाकं कर्म द्विविधं सोपक्रमं निरुपक्रमं च । तत्र यथा आर्द्रं वस्त्रं वितानितं लघीयसा कालेन शुष्येत्, तथा सोपक्रमम् । यथा च तत् एव सम्पिण्डितं चिरेण संशुष्येदेवं निरुपक्रमम् । यथा च अग्निः शुष्के कक्षे मुक्तो वातेन समन्ततो युक्तं क्षेपीयसा कालेन दहेत्, तथा सोपक्रमम् । यथा वा सः एव अग्निः तृणराशौ क्रमतोः अवयवेषु न्यस्तः चिरेण दहेत्, तथा निरुपक्रमम् । तत् संयमात् अपरान्त-ज्ञानम्, अरिष्टेभ्यः वा ॥२२॥

मैत्र्यादिषु बलानि ॥२३॥

मैत्री-करुणा-मुदित-इति तिस्रः भावनाः । तत्र भूतेषु सुखितेषु मैत्रीं भावयित्वा करुणा-बलं लभते । पुण्य-शीलेषु मुदितां भावयित्वा मुदिताबलं लभते । भावनातः समाधिर्यः स संयमः । ततः बलान्यबन्ध्यवीर्याणि जायन्ते । पाप-शीलेषु उपेक्षा न तु भावना । ततः च तस्यां नास्ति समाधिः इति एतः न बलमुपेक्षातः तत्र संयम-अभावात् इति ॥२३॥

बलेषु हस्ति-बलादीनि ॥२४॥

हस्ति-बले संयमात् हस्तिबलः भवति । वैनतेय-बले संयमात् वैनतेय-बलः भवति । वायु-बले संयमात् वायु-बलः इति एवम् आदि ॥२४॥

प्रवृत्ति-आलोक-न्यासात् सूक्ष्म-व्यवहित-विप्रकृष्ट-ज्ञानम् ॥२५॥

ज्योतिष्मती प्रवृत्तिः उक्ता मनसः । तस्यां य आलोकः तं योगी सूक्ष्मे वा व्यवहिते वा विप्रकृष्टे वार्थे विन्यस्य तमर्थमधिगच्छति ॥२५॥

भुवन-ज्ञानं सूर्ये संयमात्॥२६॥

तत्प्रसारः सप्तलोकाः । तत्र-अवीचेः प्रभृति मेरुपृष्ठं यावत् इत्येव भूर्लोकः । मेरुपृष्ठात् आरभ्य आध्रुवात्-ग्रह-नक्षत्र-तारा-विचित्रः अन्तरिक्ष-लोकः । तत् परः स्वर्लोकः पञ्च-विधः माहेन्द्रः तृतीयः लोकः । चतुर्थः प्राजापत्यो महर्लोकः । त्रिविधः ब्राह्मः, तत् यथा—जनलोकः, तपोलोकः, सत्यलोकः इति ।

'ब्राह्मः त्रि-भूमिकः लोकः प्राजापत्यः ततः महान्।
माहेन्द्रः च स्वरित्युक्तः दिवि तारा भुवि प्रजाः ॥' इति सङ्ग्रहश्लोकः ।

तत्र-अवीचेः उपरि-उपरि निविष्टाः षण्-महा-नरक-भूमयो घन-सलिल-अनल-आकाश-तमः प्रतिष्ठा महाकाल-अम्बरीष-रौरव-महारौरव-कालसूत्र-अन्धतमिस्राः । यत्र स्वकर्म-उपार्जित-दुःख-वेदनाः प्राणिनः कष्टमायुर्दीर्घम्-आक्षिप्य जायन्ते । ततः महातल-रसातल-अतल-सुतल-वितल-तलातल-पाताल-आख्यानि सप्त पातालानि । भूमिः इयमष्टमी सप्त-द्वीपा वसुमती, यस्या सुमेरुः मध्ये पर्वतराजः काञ्चनः । तस्य राजत-वैदूर्य-स्फटिक-हेममणिमयानि शृङ्गाणि ।

तत्र वैदूर्यप्रभा अनुरागान् नीलोत्पल-पत्रश्यामः नभसः दक्षिणः भागः । श्वेतः पूर्वः, स्वच्छः पश्चिमः, कुरुण्डकाभः उत्तरः । दक्षिण-पार्श्वे च अस्य जम्बूः । यतः अयं जम्बूद्वीपः तस्य सूर्य-प्रचारात् रात्रिन्दिवं लग्नम् इव विवर्तते । तस्य नील-श्वेत-शृङ्गस्य उदीचीनाः त्रयः पर्वता द्विसहस्रायामाः ।

तदन्तरेषु त्रीणि वर्षाणि नव-नव-योजन-साहस्राणि रमणकं हिरण्मयमुत्तराः कुरवः इति । निषध-हेमकूट-हिमशैला दक्षिणतः द्विसाहस्रायामाः । तदन्तरेषु त्रीणि वर्षाणि नव-नव-योजन-साहस्राणि हरिवर्षं किम्पुरुषं भारतम् इति । सुमेरोः प्राचीना भद्राश्वा माल्यवत् सीमानः । प्रतीचीनाः केतुमाला गन्धमादन-सीमानः । मध्ये वर्षम् इलावृतम् । तदेतत् योजन-शत-साहस्रं, सुमेरोः दिशि दिशि तत् अर्धेन व्यूढम् ।

सः खलु अयं शत-साहस्रायामः जम्बू-द्वीपः ततः द्विगुणेन लवण-ओदधिना वलय-आकृतिना वेष्टितः । ततः च द्विगुणा द्विगुणा शाक-कुश-क्रौञ्च-शाल्मल-मगध-पुष्कर-द्वीपाः। सप्त-समुद्राः च सर्षप-राशि-कल्पाः सविचित्र-शैलावतंसा इक्षुरस-सुरा-सर्पिः दधि-मण्ड-क्षीर-स्वाद-उदकाः । सप्त-समुद्र-परिवेष्टिताः वलय-आकृतयः लोकालोक-पर्वत-परिवाराः पञ्चाशद् योजन-कोटि-परिसङ्ख्याताः ।

तदेतत् सर्वं सुप्रतिष्ठित-संस्थानम् अण्डमध्ये व्यूढम् । अण्डं च प्रधानस्थाणुः अवयवः यथाकाशे खद्योतः इति । तत्र पाताले जलधौ पर्वतेष्वेतेषु देवनिकायाः असुर-गन्धर्व-किन्नर-किम्पुरुष-यक्ष-राक्षस-भूत-प्रेत-पिशाच-अपस्मारक-अप्सरः ब्रह्मराक्षस-कूष्माण्ड-विनायकाः प्रतिवसन्ति । सर्वेषु द्वीपेषु पुण्यात्मानः देवमनुष्याः। सुमेरुः त्रिदशानाम् उद्यानभूमिः । तत्र मिश्रवनं नन्दनं चैत्ररथं सुमानसम् इति उद्यानानि। सुधर्मा देवसभा । सुदर्शनं पुरम् । वैजयन्तः प्रासादः ।

ग्रह-नक्षत्र-तारकाः तु ध्रुवे निबद्धा वायु-विक्षेप-नियमेन उपलक्षित-प्रचाराः सुमेरोः उपरि उपरि सन्निविष्टाः विपरिवर्तन्ते । माहेन्द्र-निवासिनः षड्- देवनिकायाः—त्रिदशाः, अग्निष्वात्ताः, याम्याः, तुषिताः, अपरिनिर्मित-वशवर्तिनः, परिनिर्मित-वशवर्तिनः च इति। ते सर्वे सङ्कल्प-सिद्धाः अणिमादि एश्वर्योपपन्नाः कल्पायुषः वृन्दारकाः कामभोगिनः औपपादिक-देहाः उत्तमानुकूलाभिः अप्सरोभिः कृतपरिवाराः ।

महति लोके प्राजापत्ये पञ्चविधः देवनिकायः—कुमुदाः, ऋभवः, प्रतर्दनाः, अञ्जनाभाः, प्रचिताभाः इति । एते महाभूत-वशिनः ध्यानाहाराः कल्प-सहस्र-आयुषः।

प्रथमे ब्रह्मणः जनलोके चतुर्विधः देवनिकायः—ब्रह्मपुरोहिताः, ब्रह्मकायिकाः, ब्रह्ममहाकायिकाः, अजरामराः इति । एते भूतेन्द्रिय-वशिनः द्विगुण-द्विगुणोत्तर-आयुषः। द्वितीये तपसि लोके त्रिविधः देवनिकायः—आभास्वराः, महाभास्वराः, सत्य-महाभास्वराः इति । एते भूतेन्द्रिय-प्रकृति-वशिनः द्विगुण-द्विगुणोत्तर-आयुषः। सर्वे ध्यानाहाराः ऊर्ध्वरेतसः ऊर्ध्वमप्रतिहत-ज्ञाना अधरभूमिषु अनावृत-ज्ञान-विषयाः । तृतीये ब्रह्मणः सत्यलोके चत्वारः देवनिकायः—अच्युताः, शुद्धनिवासाः, सत्याभाः संज्ञासंज्ञिनः च इति । ते च अकृत-भवन-न्यासाः स्वप्रतिष्ठा उपरि-उपरि-स्थिताः प्रधान-वशिनः यावत्सर्गायुषः ।

तत्र अच्युताः सवितर्क-ध्यानसुखाः । शुद्ध-निवासाः सविचार-ध्यानसुखाः । सत्याभा आनन्दमात्र-ध्यानसुखाः । संज्ञासंज्ञिनः च अस्मितामात्रध्यानसुखाः । ते अपि त्रैलोक्यमध्ये प्रतितिष्ठन्ति । त एते सप्त-लोकाः सर्व एव ब्रह्मलोकाः । विदेह-प्रकृतिलयाः तु मोक्षपदे वर्तन्ते, न लोकमध्ये न्यस्ताः इति । एतत् योगिनां साक्षात्-कर्तव्यं सूर्य-द्वारे संयमं कृत्वा, ततः अन्यत्रापि एवं तावत् अभ्यसेद् यावदिदं सर्वं दृष्टम् इति ॥२६॥

चन्द्रे तारा-व्यूह-ज्ञानम् ॥२७॥

चन्द्रे संयमं कृत्वा तारा-व्यूहं विजानीयात्॥२७॥

ध्रुवे तद्गति-ज्ञानम् ॥२८॥

ततः ध्रुवे संयमं कृत्वा ताराणां जानीयात। ऊर्ध्व-विमानेषु कृत-संयमः तानि जानीयात्॥२८॥

नाभि-चक्रे काय-व्यूह-ज्ञानम् ॥२९॥

नाभि-चक्रे संयमं कृत्वा काय-व्यूहं विजानीयात्। वात-पित्त-श्लेष्माणः त्रयः दोषाः सन्ति । धातवः सप्त। त्वक्-लोहित-मांस-स्नायु-अस्थि-मज्जा-शुक्राणि । पूर्वं पूर्वमेषां बाह्यम् इति एषः विन्यासः ॥२९॥

कण्ठ-कूपे क्षुत्पिपासा-निवृत्तिः ॥३०॥

जिह्वायाः अधस्तात् तन्तुः । ततः अधस्तात् कण्ठः । ततः अधस्तात् कूपः । तत्र संयमात् क्षुत्पिपासे च बाधेते ॥३०॥

कूर्म-नाड्यां स्थैर्यम् ॥३१॥

कूपात् अधः उरसि कूर्म-आकारा नाडी । तस्यां कृतसंयमः स्थिरपदं लभते । यथा सर्पो गोधा वेति ॥३१॥

मूर्धज्योतिषि सिद्ध-दर्शनम् ॥३२॥

शिरः-कपाले अन्तश्छिद्रं प्रभास्वरं ज्योतिः । तत्र संयमात् सिद्धानां द्यावा-पृथिव्योः अन्तराल-चारिणां दर्शनम् ॥३२॥

प्रातिभाद् वा सर्वम् ॥३३॥

प्रातिभं नाम तारकम् । तद्विवेकजस्य ज्ञानस्य पूर्वरूपम् । यथा-उदये प्रभा भास्करस्य । तेन वा सर्वमेव जानाति योगी, प्रातिभस्य ज्ञानस्य-उत्पत्ताव् इति ॥३३॥

हृदये चित्तसंवित॥३४॥

यद् इदम् अस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म, तत्र विज्ञानम् । तस्मिन् संयमात् चित्तसंवित्॥३४॥

सत्त्व-पुरुषयोः अत्यन्ता-संकीर्णयोः प्रत्यया-विशेषो भोगः परार्थत्वात् स्वार्थसंयमात् पुरुषज्ञानम् ॥३५॥

बुद्धि-सत्त्वं प्रख्या-शीलं समान-सत्त्वोप-निबन्धने रजः तमसौ वशीकृत्य सत्त्व-पुरुष-अन्यता-प्रत्ययेन परिणतम् । तस्मात् च सत्त्वात् परिणामिनः अत्यन्त-विधर्मा विशुद्धः अन्यः चितिमात्र-रूपः पुरुषः। तयोः अत्यन्त-असङ्कीर्णयोः प्रत्यय-अविशेषः भोगः पुरुषस्य, दर्शित-विषयत्वात्। सः भोग-प्रत्ययः सत्त्वस्य परार्थत्वा दृश्यः । यस्तु तस्मात् विशिष्टः चितिमात्र-रूपः अन्यः पौरुषेयः प्रत्ययः तत्र संयमात् पुरुष-विषया प्रज्ञा जायते । न च पुरुषप्रत्ययेन बुद्धिसत्त्वात्मना पुरुषः दृश्यते । पुरुषः एव तं प्रत्ययं स्वात्मावलम्बं पश्यति । तथा हि उक्तम्— ‘विज्ञाताः अमरे केन विजानीयात्’ [बृ.आ.उ. २.४.१४] इति ॥३५॥

ततः प्रातिभ-श्रावण-वेदना-आदर्श-आस्वाद-वार्ता जायन्ते ॥३६॥

प्रातिभात्सूक्ष्म-व्यहित-विप्रकृष्ट-अतीत-अनागतज्ञानम् । श्रावणात् दिव्य-शब्द-श्रवणम् । वेदनात् दिव्य-स्पर्श-अधिगमः । आदर्शात् दिव्य-रूप-संवित्। आस्वादात् दिव्य-रस-संवित्। वार्तातो दिव्य-गन्ध-विज्ञानम् इति एतानि नित्यं जायन्ते ॥३६॥

ते समाधौ उपसर्गाः व्युत्थाने सिद्धयः ॥३७॥

ते प्रतिभादयः समाहित-चित्तस्य उत्पद्यमाना उपसर्गाः, तत् दर्शन-प्रत्यनीकत्वात्। व्युत्थित-चित्तस्य उत्पद्यमानाः सिद्धयः ॥३७॥

बन्ध-कारण-शैथिल्यात् प्रचार-संवेदनात् च चित्तस्य परशरीर-आवेशः ॥३८॥

लोलीभूतस्य मनसः अप्रतिष्ठस्य शरीरे कर्माशयवशात् बन्धः प्रतिष्ठेति अर्थः । तस्य कर्मणः बन्धकारणस्य शैथिल्यं समाधि-बलात् भवति । प्रचार-संवेदनात् च चित्तस्य समाधिजम् एव । कर्म-बन्ध-क्षयात् स्वचित्तस्य प्रचार-संवेदनात् च योगी चित्तं स्वशरीरात् निष्कृष्य शरीर-अन्तरेषु निक्षिपति। निक्षिप्तं चित्तं च इन्द्रियाणि अनुपतन्ति। यथा मधुकर-राजानं मक्षिका उत्पतन्तमनूत्पतन्ति निविशमानम् अनुनिविशन्ते तथा इन्द्रियाणि परशरीरावेशे चित्तम् अनुविधीयन्तः इति ॥३८॥

उदान-जयात् जल-पङ्क-कण्टकादिषु असङ्ग उत्क्रान्तिः च ॥३९॥

समस्त इन्द्रिय-वृत्तिः प्राणादि-लक्षणः जीवनम् । तस्य क्रिया पञ्चतयी । प्राणः मुख-नासिका-गतिः आहृदय-वृत्तिः । समं नयनात्-समानः च अनाभिवृत्तिः । अपनयनात् अपान आपादतलवृत्तिः । उन्नयनात् उदान आशिरोवृत्तिः । व्यापी व्यानः इति । तेषां प्रधानं प्राणः । उदानजयात् जलपङ्क-कण्टकादिषु असङ्गः, उत्क्रान्तिः च प्रयाणकाले भवति । तां वशित्वेन प्रतिपद्यते ॥३९॥

समान-जयात्-प्रज्वलनम् ॥४०॥

जित-समानः तेजसः उपध्मानं कृत्वा ज्वलति ॥४०॥

श्रोत्र-आकाशयोः संबन्ध-संयमात् दिव्यं श्रोत्रम् ॥४१॥

सर्व्श्रोत्राणाम्-आकाशं प्रतिष्ठा सर्व-शब्दानां च । यथा-उक्तम्—तुल्य-देश-श्रवणानाम्-एकदेश-श्रुतित्वं सर्वेषां भवतीति । तत् च एतत् आकाशस्य लिङ्गमनावरणं च उक्तम् । तथा-मूर्तस्यानावरण-दर्शनात्-विभुत्वमपि प्रख्यातम्-आकाशस्य । शब्द-ग्रहण-अनुमितं श्रोत्रम् । बधिराबधिरयोः एकः शब्दं गृह्णात्यपरो न गृह्णाति इति, तस्मात् श्रोर्त्रम् एव शब्द-विषयम् । श्रोत्र-आकाशयोः संबन्धे कृतसंयमस्य योगिनः दिव्यं श्रोत्रं प्रवर्तते ॥४१॥

काय- आकाशयोः संबन्ध-संयमात् लघुतूल-समापत्तेः च आकाश-गमनम् ॥४२॥

यत्र कायः तत्राकाशं तस्य अवकाशदानात् कायस्य, तेन सम्बन्धः प्राप्तिः । तत्र कृत-संयमो जित्वा तत् सम्बन्धं लघुषु तूलादिषु अपरमाणुभ्यः समापत्तिं लब्ध्वा जितसम्बन्धो लघुः भवति। लघुत्वात् च जले पादाभ्यां विहरति, ततः तूर्णनाभि-तन्तुमात्रे विहृत्य रश्मिषु विहरति, ततः यथेष्टम् आकाश-गतिः अस्य भवतति इति ॥४२॥

बहिरकल्पिता वृत्तिः महाविदेहा, ततः प्रकाश-आवरण-क्षयः ॥४३॥

शरीरात् बहिः मनसः वृत्तिलाभः विदेहा नाम धारणा । सा यदि शरीर-प्रतिष्ठस्य मनसः बहिः वृत्तिमात्रेण भवति, सा कल्पित इति उच्यते । या तु शरीर-निरपेक्षा बहिर्भूतस्य एव मनसः बहिर्वृत्तिः, सा खल्वकल्पिता । तत्र कल्पितया साधयत्यकल्पितां महाविदेहाम् इति, यया परशरीराणि आविशन्ति योगिनः । ततः च धारणातः प्रकाशात्मनः बुद्धिसत्त्वस्य यदावरणं क्लेश-कर्म-विपाक-त्रयं रजः तमोमूलं तस्य च क्षयः भवति ॥४३॥

स्थूल-स्वरूप-सूक्ष्म-अन्वयार्थवत्त्व-संयमात् भूतजयः ॥४४॥

तत्र पार्थिवाद्याः शब्दादयः विशेषाः सहाकारादिभिः धर्मैः स्थूलशब्देन परिभाषिताः । एतद्भूतानां प्रथमं रूपम् । द्वितीयं रूपं स्वसामान्यम् । मूर्तिर्भूमिः, स्नेहो जलम्, वह्निरुष्णता, वायुः प्रणामी, सर्वतोगतिः आकाशः इति एतत् स्वरूप-शब्देन उच्यते । अस्य सामान्यस्य शब्दादयो विशेषाः । तथा चोक्तम्— "एक-जाति-समन्वितानाम्-एषां धर्ममात्र-व्यावृत्तिः" इति।

सामान्य-विशेष-समुदायः अत्र द्रव्यम् । द्विष्ठो हि समूहः । प्रत्यस्तमित-भेद-अवयवानुगतः। शरीरं वृक्षो यूथं वनमिति । शब्देन-उपात्त-भेद-अवयवानुगतः समूहः । उभये देवमनुष्याः । समूहस्य देवाः एक भागो मनुष्या द्वितीयो भागः ताभ्याम्-एवाभिधीयते समूहः । सः च भेद-अभेद-विवक्षितः । आम्राणां वनं ब्राह्मणानां सङ्घः, आम्रवनं ब्राह्मणसङ्घः इति । सः पुनः द्विविधः युतसिद्ध-अवयवः सङ्घातः शरीरं वृक्षः परमाणुः इति । अयुतसिद्ध-अवयव-भेदानुगतः समूहो द्रव्यम् इति पतञ्जलिः । एतत्-स्वरूपम् इति उक्तम् ।

अथ किमेषां सूक्ष्मरूपं ? तन्मात्रं भूत-कारणं, तस्य एकः अवयवः परमाणुः सामान्य-विशेषात्म-अयुतसिद्ध-अवयव-भेद-अनुगतः समुदायः इति । एवं सर्व-तन्मात्राणि एतत् तृतीयम् ।

अथ भूतानां चतुर्थं रूपं ख्याति-क्रिया-स्थिति-शीला गुणाः कार्य-स्वभाव-अनुपातिनः अन्वयः-शब्देनोक्ताः । अथैषां पञ्चमं रूपम्-अर्थवत्त्वं। भोग-अपवर्गार्थ्र्ता गुणेषु एव-अन्वयिनी गुणाः तन्मात्र-भूत-भौतिकेषु इति सर्वम् अर्थवत्। तेषु इदानीं भूतेषु पञ्चसु पञ्चरूपेषु संयमात्तस्य तस्य रूपस्य स्वरूपदर्शनं जयः च प्रादुर्भवति । तत्र पञ्चभूत-स्वरूपाणि जित्वा भूतजयः भवति, तत् जयात् वत्स-अनुसारिण्य इव गावः अस्य सङ्कल्प-अनुविधायिन्यो भूत-प्रकृतयो भवन्ति ॥४४॥

ततः अणिमादि-प्रादुर्भावः कायसंपत् तत् धर्म-अनभिघातः-च ॥४५॥

तत्र-अणिमा भवति अणुः । लघिमा लघुः भवति । महिमा महान् भवति । प्राप्तिः अङ्गुलि-अग्रेणापि स्पृशति चन्द्रमसम् । प्राकाम्यम्-इच्छ-अनभिघातः । भूमौ उन्मज्जति निमज्जति यथा उदके । वशित्वं भूत-भौतिकेषु वशी भवति अवश्यः च अन्येषाम् । ईशितृत्वं तेषां प्रभवाप्यय व्यूहानाम् ईष्टे । यत्र कामावसायित्वं सत्य-सङ्कल्पता यथा सङ्कल्पः तथा भूत-प्रकृतीनाम् अवस्थानम् । न च शक्तः अपि पदार्थ-विपर्यासं करोति । कस्मात्? अन्यस्य यत्र कामावसायिनः पूर्व-सिद्धस्य तथा-भूतेषु सङ्कल्पात् इति । एतानि अष्टौ एश्वर्याणि ।

कायसम्पद वक्ष्यमाणा । तत्-धर्म-अनभिघातः च पृथ्वी मूर्त्या न निरुणद्धि योगिनः शरीरादिक्रियां, शिलाम् अपि अनुप्रविशति इति । न आपः स्निग्धाः क्लेदयन्ति । न-अग्निरुष्णः दहति । न वायुः प्रणामी वहति । अनावरणात्मके अपि आकाशे भवति आवृतकायः सिद्धानाम् अपि अदृश्यः भवति ॥४५॥

रूप-लावण्य-बल-वज्र-संहननत्वानि काय-संपत्॥४६॥

दर्शनीयः, कान्तिमान्, अतिशय-बलः वज्रसंहननः च इति ॥४६॥

ग्रहण-स्वरूप-अस्मित-अन्वय-अर्थवत्त्व-संयमादि-इन्द्रियजयः ॥४७॥

सामान्य-विशेषात्मा शब्दादि-ग्र्राह्यः । तेषु इन्द्रियाणां वृत्तिः ग्रहणम् । न च तत् सामान्यमात्र-ग्रहणाकारम् । कथम् अनालोचितः स विषय-विशेष इन्द्रियेण मनसा-अनुव्यवसीयेत इति ? स्वरूपं पुनः प्रकाश आत्मनो बुद्धिसत्त्वस्य

सामान्य-विशेषयोः अयुत-सिद्ध-अवयव-भेद-अनुगतः समूहो द्रव्यम् इन्द्रियम् । तेषां तृतीयं रूपम् अस्मिता-लक्षणः अहङ्कारः । तस्य सामान्यस्य इन्द्रियाणि विशेषाः । चतुर्थं रूपं व्यवसाय-आत्मकाः प्रकाश-क्रिया-स्थिति-शीला गुणाः । येषाम् इन्द्रियाणि सा-अहङ्काराणि परिणामाः । पञ्चमं रूपं गुणेषु यद् अनुगतं पुरुष अर्थवत्त्वम् इति । पञ्चसु एतेषु इन्द्रिय-रूपेषु यथाक्रमं संयमः तत्र तत्र जयं कृत्वा पञ्च-रूपजयात् इन्द्रियजयः प्रादुर्भवति योगिनः ॥४७॥

ततः मनोजवित्वं विकरण-भावः प्रधान-जयः च ॥४८॥

कायस्य अनुत्तमः गति-लाभः मनोजवित्वम् । विदेहानाम् इन्द्रियाणाम् अभिप्रेत-देश-काल-विषय अपेक्षो वृत्ति-लाभो विकरणभावः । सर्व-प्रकृति विकार-वशित्वं प्रधानजयः इति । एताः तिस्रः सिद्धयः मधुप्रतीका उच्यन्ते । एताः च करण-पञ्चकरूप-जयात् अधिगम्यन्ते ॥४८॥

सत्त्व-पुरुष अन्यता-ख्याति-मात्रस्य सर्वभाव अधिष्ठातृत्वं सर्व-ज्ञातृत्वं च ॥४९॥

निर्धूत-रजः तमो-मलस्य बुद्धिसत्त्वस्य परे वैशारद्ये परस्यां वशीकारसंज्ञायां वर्तमानस्य सत्त्व-पुरुष अन्यता-ख्याति-मात्र-रूप-प्रतिष्ठस्य सर्व-भाव अधिष्ठातृत्वम् । सर्वात्मानः गुणाः व्यवसाय-व्यवसेय आत्मकाः स्वामिनं क्षेत्रज्ञं प्रति अशेष-दृश्यात्मत्वेन उपतिष्ठन्तः इत्यर्थः । सर्वज्ञातृत्वं सर्वात्मनां गुणानां शान्त उदिता-व्यपदेश्य-धर्मत्वेन व्यवस्थितानाम् एकक्रम-उपारूढं विवेकजं ज्ञानम् इति अर्थः । इति एषा विशोका नाम सिद्धिर्यां प्राप्य योगी सर्वज्ञः क्षीण-क्लेश-बन्धनः वशी विहरति ॥४९॥

तत् वैराग्यात् अपि दोष-बीज-क्षये कैवल्यम् ॥५०॥

यदा-अस्य एवं भवति क्लेश-कर्म-क्षये सत्त्वस्यायं विवेक-प्रत्ययः धर्मः । सत्त्वं च हेय-पक्षे न्यस्तं पुरुषः च अपरिणामी शुद्धः अन्यः सत्त्वादिति । एवम् अस्य ततः विरज्यमानस्य यानि क्लेश-बीजानि दग्ध-शालि-बीज-कल्पानि अप्रसव-समर्थानि तानि सह मनसा प्रत्यस्तं गच्छन्ति । तेषु प्रलीनेषु पुरुषः पुनः इदं तापत्रयं न भुङ्क्ते । तद-एतेषां गुणानां मनसि कर्म-क्लेश-विपाक—स्वरूपेण अभिव्यक्तानां चरितार्थानां प्रतिप्रसवे पुरुषस्य अत्यन्तिकः गुण-वियोगः कैवल्यम् । तदा स्वरूपप्रतिष्ठा चितिशक्तिः एव पुरुषः इति ॥५०॥

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनः अनिष्ट-प्रसङ्गात्॥५१॥

चत्वारः खलु अमी योगिनः । प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिः अतिक्रान्तभावनीयः च इति । तत्राभ्यासी प्रवृत्तमात्र-ज्योतिः प्रथमः। ऋतम्भरप्रज्ञः द्वितीयः । भूत-इन्द्रिय-जयी तृतीयः । सर्वेषु भावितेषु भावनीयेषु कृत-रक्षा-बन्धः कृत-कर्तव्य-साधनादिमान्। चतुर्थः यः तु अतिक्रान्त-भावनीयः तस्य चित्तप्रतिसर्ग एकः अर्थः । सप्त-विधास्य प्रान्तभूमिप्रज्ञा ।

तत्र मधुमतीं भूमिं साक्षात् कुर्वतो ब्राह्मणस्य स्थानिनो देवाः सत्त्वशुद्धिम् अनुपश्यन्तः स्थानैः उपनिमन्त्रयन्ते— भोः ! इह आस्यताम् इह रम्यतां, कमनीयः अयं भोगः । कमनीयेयं कन्या। रसायनमिदं जरा-मृत्यू बाधते। वैहायसम् इदं यानम्, अमी कल्पद्रुमाः, पुण्या मन्दाकिनी, सिद्धा महर्षयः, उत्तमा अनुकूला अप्सरसो, दिव्ये श्रोत्रचक्षुषी, वज्रोपमः कायः । स्वगुणैः सर्वमिदमुपार्जितम्-आयुष्मता । प्रतिपद्यताम्-इदमक्षयमजरस्थानं देवानां प्रियमिति ।

एवम् अभिधीयमानः सङ्गदोषान् भावयेत्। घोरेषु संसार-अङ्गारेषु पच्यमानेन मया जनन-मरण-अन्धकारे विपरित्वर्तमानेन कथञ्चित् आसादितः क्लेश-तिमिर-विनाशः योग-प्रदीपः । तस्य च एते तृष्णा-योनयः विषय-वायवः प्रतिपक्षाः । सः खलु अहं

लब्ध-आलोकः कथमनया विषय-मृग-तृष्णाया वञ्चितः तस्यैव पुनः प्रदीप्तस्य संसार-अग्नेः आत्मानम् इन्धनीकुर्याम् इति । स्वस्ति वः स्वप्नोपमेभ्यः कृपणजन-प्रार्थनीयेभ्यो विषयेभ्यः इति एवं निश्चितमतिः समाधिं भावयेत्।

सङ्गमकृत्वा स्मयमपि न कुर्यात् एवमहं देवानामपि प्रार्थनीयः इति । स्मयादयं सुस्थितंमन्यतया मृत्युना केशेषु गृहीतमिवात्मानं न भावयिष्यति । तथा च अस्य च्छिद्रान्तरप्रेक्षी मित्यं यत्नोपचर्यः प्रमादः लब्ध-विवरः क्लेशान्-उत्तम्भयिष्यति । ततः पुनः अनिष्ट-प्रसङ्गः, एवमस्य सङ्गस्मयाव अकुर्वतो भावितः अर्थः दृढी-भविष्यति । भावनीयः चअर्थःअभिमुखी-भविष्यति इति ॥५१॥

क्षण-तत्क्रमयोः संयमात्-विवेकजं ज्ञानम् ॥५२॥

यथा अपकर्ष-पर्यन्तं द्रव्यं परमाणुः एवं परम-अपकर्षपर्यन्तः कालः क्षणः । यावता वा समयेन चलितः परमाणुः पूर्वदेशं जह्यात् उत्तर-देशम् उपसम्पद्येत सः कालः क्षणः । तत् प्रवाह अविच्छेदः तु क्रमः । क्षण-तत्क्रमयोः न अस्ति वस्तु-समाहारः इति बुद्धि-समाहारः मुहूर्त-अहोरात्र-आदयः । सः खलु अयं कालः वस्तु-शून्यः बुद्धि-निर्माणः शब्दज्ञान-अनुपाती लैकिकानां व्युत्थित-दर्शनानां वस्तु-स्वरूप इव-अवभासते । क्षणस्तु वस्तुपतितः क्रमावलम्बी, क्रमः च क्षणान्-अन्तर्यात्मा । तं कालविदः काल इति आचक्षते योगिनः । न च द्वौ क्षणौ सह भवतः । क्रमः च न द्वयोः सहभुवोः असम्भवात्। पूर्वस्मात् उत्तरभाविनो यदानन्तर्यं क्षणस्य सः क्रमः । तस्मात् वर्तमान एवैकः क्षणो न पूर्वोत्तरक्षणााः सन्तीति । तस्मात् नास्ति तत्-समाहारः । ये तु भूत-भाविनः क्षणास्ते परिणामान्विता व्याख्येयाः । तेन एकेन क्षणेन कृत्स्नो लोकः परिणामम् अनुभवति । तत्-क्षण-उपारूढाः खलु अमी धर्माः । तयोः क्षणतत्क्रमयोः संयमात् तयोः साक्षात्करणम् । ततः च विवेकजं ज्ञानं प्रादुर्भवति ॥५२॥

तस्य विषय-विशेष उपक्षिप्यते—

जाति-लक्षण-देशैः अन्यता अनवच्छेदात्-तुल्ययोः ततः प्रतिपत्तिः ॥५३॥

तुल्ययोः देश-लक्षण-सारूप्ये जाति-भेदः अन्यताया हेतुः गौः इयं बडवेयम्-इति । तुल्य-देश-जातीयत्वे लक्षणमन्यत्वकरं—कालाक्षी गौः, स्वस्तिमती गौः इति । द्वयोः आमलकयोः जाति-लक्षण-सारूप्यात् देश-भेदः अन्यत्वकरः—इदं पूर्वम्-इदम्-उत्तरम्-इति । यदा तु पूर्वम्-आमलकम्-अन्यव्यग्रस्य ज्ञातुः उत्तरदेश उपावर्त्यते, तदा तुल्य-देशत्वे पूर्वमेतत् उत्तरमेतत् इति प्रविभागान्-अनुपपत्तिः । असन्दिग्धेन च तत्त्वज्ञानेन भवितव्यम् इत्यतः इदम् उक्तं ततः प्रतिपत्तिः विवेकज-ज्ञानादिति ।

कथं ? पूर्व-आमलक-सहक्षणो देश उत्तर-आमलक-सहक्षणदेशात् भिन्नः । ते च आमलके स्वदेश-क्षण-अनुभवभिन्ने । अन्य-देश-क्षणानुभवः तु तयोः अन्यत्वे हेतुः इति । एतेन दृष्टान्तेन परमाणोः तुल्य-जाति-लक्षण-देशस्य पूर्व-परमाणु-देश-सह-लक्षण-साक्षात्करणात् उत्तरस्य परमाणोः तत् देशानुपपत्तावुत्तरस्य तत् देश-अनुभवः भिन्नः सहक्षण-भेदात्- तयोः ईश्वरस्य योगिनः अन्यत्वप्रत्ययः भवति इति ।

अपरे तु वर्णयन्ति— ये अन्त्या विशेषाः ते-अन्यता-प्रत्ययं कुर्वन्तीति । तत्रापि देश-लक्षण-भेदः मूर्ति-व्यवधि-जाति-भेदः च-अन्यत्व-हेतुः । क्षण-भेदः तु योगि-बुद्धिगम्य एव इति । अतः उक्तं— “मूर्ति-व्यवधि-जाति-भेदा-भावान्नास्ति मूलपृथक्त्वं” इति वार्षगण्यः ॥५३॥

तारकं सर्व-विषयं सर्वथा-विषयम् अक्रमं च-इति विवेकजं ज्ञानम् ॥५४॥

तारकम्-इति स्वप्रतिभौत्थमन-ओपदेशिकम्-इत्यर्थः । सर्व-विषयं न-अस्य किञ्चित्-अविषयी-भूतम्-इति-अर्थः । सर्वथा-अविषयम्-अतीत-अनागत-प्रत्युत्पन्नं सर्वं सर्वथा जानाति इति अर्थः । अक्रमम्-इति-एक-क्षणोपरूढं सर्वं सर्वथा गृह्णाति इति अर्थः । एतत् विवेकजं ज्ञानं परिपूर्णम् । अस्य एव अंशः योग-प्रदीपः मधुमती-भूमिम्-उपादाय

यावदस्य परि-समाप्तिः इति ॥५४॥

प्राप्त-विवेकज-ज्ञानस्य-अप्राप्त-विवेकज-ज्ञानस्य वा—

सत्त्व-पुरुषयोः शुद्धि-साम्ये कैवल्यम्-इति ॥५५॥

यदा निर्धूतरजः तमः मलं बुद्धिसत्त्वं सत्त्व-पुरुषस्य-अन्यता-प्रत्यय-मात्र-अधिकारं दग्ध-क्लेश-बीजं भवति, तदा पुरुषस्य शुद्धि-सारूप्यम्-इव-आपन्नं भवति । तदा पुरुषस्य उपचरित-भोग-अभावः शुद्धिः । एतस्याम्-अवस्थायां कैवल्यं भवति ईश्वरस्य अनीश्वरस्य वा विवेकज-ज्ञान-भागिनः इतरस्य वा । न हि दग्ध-क्लेश-बीजस्य ज्ञाने पुनः अपेक्षा काचित् अस्ति । सत्त्व-शुद्धि-द्वारेण-एतत् समाधिजम्-ऐश्वर्यं च ज्ञानं चोपक्रान्तम् । परमार्थतः तु ज्ञानात् अदर्शनं निवर्तते। तस्मिन् निवृत्ते न सन्ति उत्तरे क्लेशाः। क्लेश-अभावात् कर्म-विपाक-अभावः। चरित-अधिकाराः च एतस्याम्-अवस्थायां गुणा न पुरुषस्य दृश्यत्वेन पुनः उपतिष्ठन्ते । तत् पुरुषस्य कैवल्यम् । तदा पुरुषः स्वरूप-मात्र-ज्योतिः अमलः केवली भवति ॥५५॥

इति पतञ्जलि-विरचिते योग-सूत्रे तृतीयो विभूति-पादः